श्रीगणेशायनमः॥ महासंकल्पप्रारंभः॥ सच्चिदानंदरूपस्यश्रीमदादिनारायणस्याचिंत्यपरिमितस्यशक्त्याम्रियमाणानांमहाजलौघमध्येपरिभ्रममाणानामनेककोटिब्रह्मांडानामेकतमेस्मिन्व्यक्तौमहदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृतेस्मिंमहतिब्रह्मांडकटाहकरंडेसकलजगदाधारशक्तिकूर्मवराहानंतैरावतपुंडरीकवामनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीकाष्टदिग्गजोपरिप्रतिष्ठितस्यातलवितलसुतलरसातलमहातलपातालाख्यसप्तलोकोपरिभागेभूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकाख्यलोकषट्कस्याधोभागेमहाकालायमानफणिराजशेषसहस्रफणामंडलविधृतेदिग्दंतिशुंडादंडस्तंबितेवहिरंधतमसावृतेनातसूर्यप्रकाशितेनलोकालोकनामनेनशैलेनवेष्टितेभूमंडलेशुभसरासर्पि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

महासं० १

दधिक्षीरस्वादुकाख्यमहार्णवपरिवेष्टिते जंबुप्लक्षकुशक्रौंचशाल्मलिशाकपु
ष्पाराख्यसप्तद्वीपविराजिते स्वर्णप्रस्थचंद्रश्वेतावर्तरमणसिंहलमहा
लवणपारसीकपांचजन्यलंकाद्युपद्वीपसहिते एवंविधसरोरुहाकारयंचा
शत्कोटियोजनाविस्तीर्णभूमंडले तुहिमाचलहेमकूटनिषधनीलश्वेतशृंगि
गंधमादनपारियात्राख्याष्टसीमाचलैर्विभक्ते तन्मध्यावर्तिभारताख्ये पुरुष
दंष्टिकर्णेलाघृतराख्यकहिरण्मयकुरुभद्राश्वकेतुमालाख्यनववर्षशोभिते जं
बुद्वीपे नानावर्णकेसराचलशिखररत्नबीजांचितभूसरोरुहकर्णिकायमान
स्यमेरोर्दक्षिणदिग्भागे दक्षिणो दधिहिमाचलयोर्मध्यप्रदेशेनवसह
स्रयोजनविभक्तेइंद्रद्वीपकसेरुताम्रपर्णगभस्तिनागसौम्यगंधर्ववारुण
भारताख्यनवखंडवत्यस्मिन्भारतेवर्षेदक्षिणोदधिप्रभृतिसहस्रयो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जनवतिभरतखंडेस्वाभ्यवंतिकुरुक्षेत्रादिसमभूममध्येरेखायाःअमुकदिग्भागे
अयोध्यामथुरामायाकाशीकांचीअवंतिद्वारवत्यादिमुक्तिक्षेत्रवत्यामस्यांकमेरू
र्मौभागीरथीविंध्याचलंगोदावरीणांदक्षिणदिग्भागेकावेरीमलयाचलरामसेतू
नामुत्तरदिग्भागेश्रीशैलहेमकूटकिष्किंधागरुडाचैलारुणागिरिहस्तिगिरिप्र
भृतिपुण्यशैलवतिदंडकारण्येनानापुण्यतीर्थवत्यस्मिन्देशविशेषेमुकतीर्थे
श्रीमदनेककोटिब्रह्मांडघटनायासरोमविवरस्यविराट्रूपिणोभगवतोमहा
पुरुषस्यशेषपर्यंकशायिनःश्रीविष्णोराज्ञेयाप्रवर्तमानेस्यतन्नाभिरुत्थानस
रोरुहादुत्पन्नस्यसकलवेदनिधेःसकलजगत्स्रष्टुःपरार्धद्वयजीविनोब्रह्मणः
प्रथमपरार्धंपंचाशत्यतीतायांद्वितीयपरार्धेश्वेतवराहकल्पेप्रथमवर्षेप्रथ
ममासेप्रथमपक्षेप्रथमदिवसेअहनिउदयादित्रयोदशघटिकास्वतीतासुस्वा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महासंक० २

यंभुवस्वारोचिषोत्तमतामसरैवतचाक्षुषाख्येषुषट्सुमनुष्वतीतेषुउपरितन
घटिकायांसप्तमेवैवस्वतमन्वंतरेसप्तविंशतिमहायुगेषुगतेषुअष्टाविंशतितमे
महायुगेपुरुकूतनामेंद्रसमयेकृतत्रेताद्वापारेषुगतेषुवर्तमानेकलियुगेप्रथम
पादेबौधावतारेशालिवाहनशकेसौरचांद्रमानेप्रभवादिषष्टिसंवत्सरांतर्गते
प्रथमविंशत्यांवर्तमानेव्यवहारिकेप्रमोदनामसंवत्सरेदक्षिणायनेवर्षर्तौभा
द्रपदेमासेशुक्लपक्षेदशम्यांपुण्यतिथौमंदवारेपूर्वाषाढानक्षत्रेआयुष्मानयो
गेतैतिलकरणेसिंहस्थेसूर्येधनुस्थेचंद्रेसिंहस्थेभौमेकन्यास्थेबुधेवृषभस्थे
देवगुरौतुलास्थेशुक्रेवृश्चिकस्थेशनैश्चरेकन्यास्थेराहौमीनस्थेकेतौरवंयु
णविशिष्टपुण्यकालेअमुकगोत्रस्यामुकनक्षत्रेअमुकराशौजातस्यअमु
कनामधेयस्यममेहजन्मनिजन्मांतरेचनानायोनिषुज्ञानतोज्ञानतश्चबा २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ल्यकौमारयौवनवार्धकेषुजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनोवाक्कायकर्मभिःकृ
मक्रोधलोभमोहमदमात्सर्यैस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पादपायूपस्थैः
संभावितानांप्रकाशकृतब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पगाख्यानांम
हापातकानांतत्संसर्गिणांचोपपातकानांरहस्यकृतंतत्संसर्गित्वानुग्राहकत्वय
योजकत्वमित्रभावेपदेशेष्टत्वानुमंत्रित्वप्रोत्साहकत्वादिमहापातकप्रभृतिदि
ष्टोपपातकानांगुर्वधिक्षेपवेदनिंदासुहृद्वधाधीतनाशनादिब्रह्महत्यासम
रूपपातकानामुत्कर्षानृतभाषणाभक्ष्यभक्षणरजस्वलामुखास्वादनादि
सुरापानसमपातकानामश्वरत्वमनुष्यहरणनिक्षेपहरणदेवब्राह्मणद्रव्य
भूमिहरणधेनुहरणादिसुवर्णस्तेयसमरूपपातकानांपितृष्वसृमातृष्वस
मातुलभार्याज्येष्ठभ्रातृपत्नीमातुःसपत्नीपितृव्यपत्नीभगिनीदुहित्रसखी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

म॰ सं॰ ३ भार्यां कुमार्यजातस्वप्रत्यजस्त्रीस्वपानृपत्नीश्रोत्रियर्त्विगुपाध्यायाचार्येभि
त्रपत्नीरजस्वलाशरणागताहीनवर्णासयोनिज्ञासगोत्रास्त्रीगमनादिगुरुत
ल्पसमरूपपातकानांसोमयाजस्यक्षत्रियवैश्यवधाविज्ञातगर्भारजस्व
लात्रिगोत्रादीक्षितस्त्रीसुर्विणीवधादिमहापातकसमरूपपातकानामुत्क
र्षानृतभाषणकलंजाशिनिषद्यभक्षणरजस्वलासुरास्वादनकूटसाक्ष्य
सूदृढंधनादिपरिवेदनभृतकाध्ययनाध्यापनपारदार्यपारिवित्यवार्धुष्य
लवणविक्रयस्त्रीशूद्रविट्क्षत्रियवधनिंद्यार्थोपजीवननास्तिक्यव्रतलोपकरण
सूतविक्रयधान्यपशुस्तेयाद्ययाजनपितृमातृसूतादित्यागतडागाराम
विक्रयकन्यादूषणपरिनिंदकयाजनपरिक्तिकन्याप्रदानकौटिल्यव्रतलो
पात्मार्थक्रियारंभमद्यपस्त्रीनिषेवणस्वाध्यायाग्निपरित्यागेधनार्थंद्रुमछे ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दनस्त्रीहिंसनयंत्रविधानव्यसनात्मविक्रयशूद्रद्रव्यहीनसद्रव्यहीनयोनिनिषे
वणानाश्रमवासपरान्नपुष्टयसच्छास्त्राभिगमनाकराधिकारिताभार्याविक्रयाधु
पपातकानामजाविखरोष्ट्रमृगेभमीनाहिमहिषाश्ववधादिसंकरीकरणानांङ्क
मिकीटक्यावधमय्यानुगतद्रव्यभोजनफलेक्षुकुसुमस्तेयादिमलिनीकरणा
नांनिंदितधनधान्यकरीषजीवनासत्यभाषणशूद्रसेवाध्वजीकरणानांमद्य
गंधाघ्राणब्राह्मणपीडनसामान्यस्त्रीमैथुनादिजातिभ्रंशकरणानांविहितक
र्मत्यागनिषिद्धाचरणेंद्रियानिग्रहपरमौहूर्तदनसूचकलशौचस्नानसं
ध्यावंदनजपहोमपंचमहायज्ञरहितभोजनकालभोजनदिवाद्विवारभोज
नसस्यछेदनतरुगुल्मलतादिछेदनकूटव्यस्त्रीवश्यश्ववपतिदीवब्राह्मणपरिवे
त्तृपरिवित्तिशूद्रसेवकवाधुर्षकनिंदकमविहितान्नभोजनंयत्तन्नभोज

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नयतिप्रेरितान्नयतिपक्वान्नयतिपात्रस्थान्नयतिस्पृष्टयतिदापितान्नभोज
नशूद्रस्पृष्टशूद्रदृष्टशूद्रानुमतिशूद्राधिक्रुतशूद्रयाचितान्नभोजनग्रहण
भोजनग्रहणकालपक्वान्नभोजनपर्वकालरात्रिभोजनानिवेदितान्नभोजन
हस्तदत्तान्नहस्तपरिविष्टान्नादिभोजनप्रेतपिशाचोद्दिश्यभोजनबलिबलि
दत्तान्ननीराजितान्नभोजनवटाश्चत्थादिनिषिद्धपात्रभोजनग्रामयाजकदे
वलकवृषलीपतिमाहिषिकशिवद्विजशाक्तपाषंडपाशुपतचिह्नितांगचिकि
त्सिकज्यौतिषिकाशौचिपतितान्नभोजनभिन्नकांस्यपात्रभोजनताम्रालाबु
दारुपाषाणमृत्पात्रभोजनरजस्वलाचांडालादिवाक्यश्रवणभोजनदग्ध
पुरीषपूतिगंधिसुक्तोच्छिष्टभोजनगणान्नदक्षितान्नशूद्रपुरोहितान्नपर्या
यान्नशूद्रपात्रस्थान्नभोजनमहापुरुषोद्दिश्यभोजनामुषितान्नभोजनशू

Digitized by Arya Samaj Foundation Chennai and eGangotri

शूद्रभक्तशेषान्नग्रामांत्यजदत्तशेषान्नभोजनसदाभिक्षान्नदंयतीभुक्तशेषांन
भोजनजैनबौद्धचार्वाकसर्वब्राह्मणान्नभोजनकाराग्रहयानभोजनखरोष्ट्रा
जाविमहिषीक्षीरादिपानविवत्साविगतगर्भानिर्दशगोक्षीरादिपानस्तन्यपा
नवामहस्तैकहस्तवर्षधारापरदत्तजलपानपिण्याकक्रूसरसंधानपायसापू
पमांसपुरोडाशादिहथाभक्षणरेतोविण्मूत्रकेशकीटकादिमिश्रितान्नभोज
नताटकूजलपानछर्दितान्नभोजनवातीककालिंगगृंजररक्तमूलकादिनि
षिध्यभक्षणनिषिध्यशिवनिर्माल्यभक्षणारनालपक्वतंदुलान्नभक्षण
गोमुखजलपानयोनिभक्षणयोन्यास्वादनदिवास्वापनदिवामैथुनदासीवेश्या
कुलटाविवंशुपरावरुध्यगर्भिणीसाधारणीभूतपरस्त्रीगमनतिर्यक्योनिग
मनमुखमैथुनरथारोजमार्गवृक्षदेवालयगृहांगणगोष्ठवृंदावनजलाश

दि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महासंक० ५ यादिस्खलैतोविष्मूत्रकरणपित्तमाचार्यादिशुश्रूषाराहित्यदर्शमहालयसं
क्रांतिव्यतीपाताष्टकालभ्ययोगगजच्छायादिश्राद्धविस्मरणग्रहणपुण्यकाला
दिस्नानदानादिराहित्यसंध्यात्रयवस्त्रपरिवर्तनोपासनादिराहित्यसंध्याका
लसङ्गपतांबूलचर्वणभोजनमैथुननिद्रायेकादश्यहोरात्रभोजनाशुद्धजलस्ना
ननग्नस्नानामंत्रकस्नाननिषिद्धदिनाभ्यंगस्नानतीर्थसंनिहितीर्थोल्लंघनती
र्थस्नानकुछराहित्यद्विकुछपीकौनेपुछादिकृतकुछकुत्वस्वग्रामदेवोसवादश
नतदुत्सवजनपदग्रामकुलाचारोल्लंघनगुर्वाचार्यविप्रश्रोत्रियाहिताग्निन्ट
पकार्योल्लंघनविप्रत्वंकारहुंकारतिरस्कारवादपराजयप्रापणसहायारण्य
मार्गगमनब्राह्मणदंडनभर्त्सनताडनशोणितश्रावणमलिनामेध्यनीलादिव
स्त्रधारणहरिहरगुर्वाचार्यनिंदाश्रवणब्रह्मदूषणक्षोभकरणसहृत्यागश्च ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

6

स्त्रियादिवृत्तिधनार्जनगोनिरोधनस्वयंधृतहलकर्षणकृषिजीवनोक्तोचजीवन
पीतावशिष्टोदकस्नानचांडालकारितकृषिजीवनचांडालकारितकृषिधान्यशाक
दुष्पुष्पफलभोगचांडालकृतवापीकूपतटाकोदकपानान्यकारितप्रपाजलपा
नकरमर्दितनक्रपानादिशिरोभ्यक्तोवशिष्टतैलपानसाभिलाषविषयदर्शनदु
र्मरणसंकल्पकरणशस्त्रधारणसाभिलाषपरस्त्रीनिरीक्षणमिथुनीभूतस्त्रीनि
रीक्षणनग्नस्त्रीनिरीक्षणहीनवर्णाभिवादनचार्वाकपाषंडयूजितदेवाभिवादन
परोपतापकरणपरोपकारनाशतृणगुल्मलतादिनाशनगोमांसगंधाघ्राण
चांडालस्पर्शनसंभाषणपाकभेदपंक्तिभेदकरणम्लेछमध्यनिवासम्लेछद्र्व्यो
पभोगयाचमानदीनाधकृपणाक्षेपणतिल्लादिनानाप्रकारदुष्टातिग्रहनिय
मरहितवेदपुराणशास्त्राध्ययनाध्यापनव्यवहारपक्षपातसाधारणब्राह्म

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णगृहसीमाकुल्याहटाककूपारामाद्यपहारणपशुपक्षिबंधनशीतवातातप
वर्षचौराद्यापदुत्तदुःखनिवारणानर्हसनशयनप्रदानविषमभाषणवाक्पारुष्यदंडपारु
ष्याविहीतकालेविहिताचरणमित्रस्वामिसुहृदाचार्येष्टभार्यादेवतावंचनपरमा
त्मस्मरणराहित्यादीनांप्रकीर्णकानांसकृत्कृतानामभ्यस्तानामत्यंतचिरका
लनिरंतराभ्यस्तानांमहापातकादीनांप्रकीर्णकानांनानाविधानांबहुविधा
नांसर्वेषांपापानामपनोदार्थंएतत्तीर्थस्नानादिकल्योक्तफलावाप्त्यर्थंश्री
परमेश्वरप्रीत्यर्थंचअस्मिन्अमुकतीर्थेस्नानमहंकरिष्ये॥एवंयथादेशंय
थाकालंयथाकामंदेशकालौसंकीर्त्यनपूर्वकंसंकल्पंकृत्वादशविधस्नानानि
कुर्यात्॥भस्मगोमयमृत्तिकास्नानानिसर्वप्रायश्चित्तोक्तप्रकारेणकुर्यात्॥ ६
॥इतिमहासंकल्पेमाघशुक्लप्रकारेणसमाप्तं॥ ॥ गोपालात्मजबापू
भट्टखाडिलकरेणलिखितं॥संवत्१८०५विक्रमसंवत्॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महासंक- णगृहसीमाकुल्याहटाककूपारामाद्यपहारणपशुपक्षिबंधनशीतवातातप
६ वर्षचौराद्यापद्दुःखनिवारणानाहोसनशयनप्रदानविषमभाषणवाक्पारुष्यदंडपारु
ष्याविहीतकालेविहिताचरणमित्रस्वामिसुहृदाचार्येष्टभार्यादेवतावंदनयरमा
त्मस्मरणरहितादीनांप्रकीर्णकानांसुकृतानामभ्यस्तानामत्यंतचिरका
लनिरंतराभ्यस्तानांमहापातकादीनांप्रकीर्णकानांनानाविधानांबहुविधा
नांसर्वेषांपापानामपनोदार्थंएतत्तीर्थस्नानादिकलोक्तफलावाप्त्यर्थंश्री
परमेश्वरप्रीत्यर्थंचअस्मिन्अमुकतीर्थस्नानमहंकरिष्ये॥एवंयथादेशंय
थाकालंयथाकामंदेशकालौसंकल्पपूर्वंकंसंकल्पंकृत्वादशविधस्नानानि
कुर्यात्॥भस्मगोमयमृत्तिकास्नानानिसर्वप्रायश्चित्तोक्तप्रकारेणकुर्यात्॥ ६
॥इतिमहासंकल्पहेमाद्युक्तप्रकारेणसमाप्तं॥ ॥ गोपालाचार्यबापू
भट्टखांडिल्यकृतेनलिखितं॥शके१७५२विकृतिसंवत्॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॥ अथदानमंत्र॥ यज्ञोपवीतदान॥
॥ ब्रह्मस्त्वमहादिव्यंमयायत्नेनि
र्मितं॥ ब्रह्मजन्मासुमेदेवब्रह्मसू
त्रमसर्वलात्॥ गोदानं॥ युज्ञेसं
॥ धनश्भूतायाविश्वस्याधोषना
॥ शानि॥ विश्वरूपधरोदेवः प्रि
॥ यतामनयागवा॥ ३॥ आयुधगण
ना॥ अश्मयुः पंचोहंनरेवभेसमान्कारि
णांव्याघ्राद्यजादेवैः॥ गोकाव्योर्हिजि
नौस्तथोस्पृश्वरयोः सत्वानिसेर्यांशु
नां॥ अश्वायुः परमंरदोन्ववदिहानीया
युरेषांपरायुर्निघ्नंन्पराहनाचविद्
तंनेषांपयुर्भवेत्॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetha